# INFLUENCE OF DARŚANAS ON LITERATURE

*Edited by*

**Dr. S. GEETHAMONY AMMA**

**Dr. V. PRAMEELA KUMARI**

*Published by*
**PARIMAL PUBLICATIONS**
Office : 27/28, Shakti Nagar, Delhi-110007 (INDIA)
Retail Outlet : 22/3, Shakti Nagar, Delhi-110007 (INDIA)
ph. : +91-11-23845456, 47015168
e-mail : order@parimalpublication.com
url : http://www.parimalpublication.com

© Author

**First Edition : Year 2018**

**ISBN : 978-81-7110-611-0**

**Price : ₹ 350.00**

*Printed at*

**Balajee Imaging Systems**
Wazirpur Village, Delhi-52

# अद्वैतदर्शनसमीक्षा भजगोविन्दे

डॉ.एस.गीतामणि अम्मा

एकम् अद्वितीयं ब्रह्मैव सत्यमित्यद्वैतसिद्धान्तः। अद्वैतं ब्रह्मैव सत्यम् इति वेतोपनिषद्प्रतिपादितं तत्त्वं प्रस्थानत्रयभाष्यद्वारा समर्थितमाचर्यैः। श्रीशङ्करस्य स्तोत्रग्रन्थेषु प्राधान्यमर्हति भजगोविन्दाख्यः स्तोत्रग्रन्थः। मोहमुद्गरापरनाम्ना प्रसिद्धस्य ग्रन्थस्यास्य मुख्यः प्रतिपाद्यविषयस्तु तृष्णापरित्याग एव। तथापि अद्वैतदर्शनस्य मूलभूताः सर्वे सिद्धान्ता अस्मिन् संक्षेपेणोक्ताः वर्तन्ते। मरणकाले सन्निहिते व्याकरणादिपठनं कमपि न रक्षति। अतः मुक्तये गोविन्दं भजस्व इति श्रीरङ्करेण उपदिश्यते।' पल्लविरूपेण उद्गीयमानं प्रथमश्लोकमन्तरेणाचार्यमुखनिर्गलिताः द्वादशश्लोकाः द्वादशमञ्जरिकेति तदनन्तरं तच्छिष्यैः रचिताः चतुर्दशश्लोकाः चतुर्दशमञ्जरिकेति च प्रसिद्धाः। आचार्यः अन्ते पुनरपि चतुरः श्लेकान् रचितवानिति श्रूयते। एवं एकत्रिंशत् श्लोकोपेतोऽयं स्तोत्रग्रन्थः।

भज गोविन्दं भज गोविन्दं
गोविन्दं भज़ मूढमते।
संप्राप्ते सन्निहिते काले
नहि नहि रक्षति डुकृञ् करणे।। (1)

इति प्रथमश्लोकस्याद्वैतपरं व्याख्यानं तु - गोभिः उपनिषद्वाक्यैः विन्दते ज्ञायत इति गोविन्दः परमात्मा। तस्य परमात्मनः अनस्यूतध्यानं कर्तव्यमित्युपदेशः। गोविन्दं भज इति पुनरुक्तिस्तु ध्यानस्य नैरन्तर्यद्योतनाय। 'जीवो ब्रह्मैव नापर" इत्येवाद्वैतसिद्धान्तः। किन्तु अज्ञानेन स्वस्वरूपमात्मानं न जानन्ति। "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्" (ईशोपनिषत्-14) 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" (भगवद्गीता 6.24), इत्यादि श्रतिस्मृतिवाक्यैरपि एतदेव प्रतिपाद्यते। 'मूढमतिः' इति पदस्य आत्मज्ञानरहित इत्यर्थः। उक्तं चैतत् भजगोविन्दे एव "आत्मज्ञानविहीना मूढा" इति (26)। अज्ञाननिवृत्तिस्तु परमात्मज्ञानादेव। "ज्ञानादेव विमुच्यते" (योगतत्त्वोपनिषत्-16) इति श्रुतिश्च। तत्र विवेकवैराग्यादिपूर्वको निवृत्तिमार्ग अथवा ज्ञानमार्ग एव मोक्षप्राप्तये साक्षात्कारणम्। एषणात्रयसन्यासपूर्वकं भवति वैरग्यसिद्धिः।

तद् वैराग्यं जुगुप्सा या दर्शनश्रवणादिभिः
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोग्यवस्तुनि। (विवेकचूडामणिः 21)

तथा योगसूत्रेऽपि - "दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्" इति (2.14)। एषणात्रयं

नाम दारेषणा, पुत्रेषणा, वित्तेषणा चेति। तृष्णा एव मानुष्याणां संसारकारणं भवति।

अस्सारत्त्वानर्थत्त्वादीनां बोधेनैव ताभ्यो निवृत्तिः संभवति। तत्र प्रथमं वित्तेषणां दूरतःत्यक्तुमुपदिशति- मूढ जहीहि धनागमतृष्णां

कुरु सद्बुद्धिं मनसि वितृष्णाम्।
यल्लभसे निजकर्मोपात्तम्
वित्तं तेन विनोदय चित्तम्। (2) अत्र 'वितृष्णां' सद्बुद्धिरिति विशिनष्टि। निष्कामकर्मानुष्ठानेन अयाचितोपस्थितं यत्फलं तन्निसङ्गतया अनुभुङ्क्ष्व। निष्कामकर्मफलानुभवस्तु पुरुषं न बद्धनाति। तदुक्तं ईशावास्योपनिषदि-

'तेन त्यक्तेन भुञ्जीथाः

मा गृधः कस्यस्विद्धनम्' इति।

अनन्तरं दारेषणां निवर्तयितुं उपदिश्यते-

नारीस्तनभरनाभीदेशम्
दृष्ट्वा मा गा मोहावेशम्।
एतन्मांसवसादिविकारं
मनसि विचिन्तय वारं वारम्।

जीवितस्य अत्यन्तचपलतां दर्शयति चतुर्थादारभ्य षष्ठान्तेषु श्लोकेषु। प्राणिनां जीवितं कमलपत्रगतं जलमिव क्षणभङ्गुरं भवति। तदुक्तम्

नलिनीदलगतजलमतितरलं

तद्वज्जीवितमतिशयचपलम्। इति। (2)

यावत्कालं वयं धनार्जने समर्थाः भवन्ति तावत्कालमेव स्वस्य भार्यापुत्रपौत्रादिबान्धवाः स्वस्मिन्ननुरक्ताः भवन्ति। पश्चात् जर्जरशरीरे जीवति सति तं कोऽपि वार्ताऽपि न पृच्छति। अतः सर्वे स्वार्थमतयः स्वेच्छापूरणार्थमेव स्वबान्धवानपि स्निह्यन्ति। बृहदारण्यके एवं श्रूयते- "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति (बृ.उ.2.4.5) यावत् प्राणवायुः अस्मिन् शरीरे निवसति तावदेव भार्यापुत्रादयः तस्मिन्ननुरक्ताः भवन्ति। मृते सति अत्यन्तमनुरक्ता स्वभार्यापि जडे तस्मिन् शरीरे भयमाकलयति। अत एव वित्तदारादिषु अहं मम अभिमानो न कार्यः, निरर्थके संसारे अभिनिवेशोऽपि न कार्यः। अयमेव सिद्धान्तः 'का ते कान्ता कस्ते पुत्रः' (8) इत्यस्मिन् श्लोके उक्तः।।

सर्वव्यापी परमात्मा विष्णुशब्देन उच्यते। एक एव आत्मा सर्वशरीरेषु तथा प्रपञ्चे सर्वत्र च वर्तते। अतः 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इति (श्वेता.उ 6.11) श्रुत्युद्बेधितं तत्त्वं एवमुच्यतेऽस्मिन्ग्रन्थे-

त्वयि मयि चान्यत्रैको विष्णु-
र्व्यर्थ कुप्यसि मथ्यसहिष्णुः।
सर्वस्मिन्नपि पश्यात्मानं
सर्वत्रोत्सृज भेदाज्ञानम्। (24)

संसारचक्रे अज्ञानी पुनःपुनरावर्तते, आत्मज्ञानी संसारात् मुच्यत इति तत्त्वं अतिसरलया रीत्या प्रतिपाद्यते-

पुनरपि जननं पुनरपि मरणम्।
पुनरपि जननी जठरे शयनम्। इति।। (21)

अयमेवार्थः भगवद्गीतायाम् दृश्यते-जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य चेति। (2.27)

विवेकचूडामणौ एवमुक्तम्-

जनिमरणतरंगापारसंसारसिन्धुम्
प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः।। (137)

अस्य जगतो व्यवहारिकं सत्यत्वमेवेति अद्वैतसिद्धान्तः। पारमार्थिकं सत्यत्त्वं ब्रह्मण एव। अतः पुरोदृश्यमानं इदं जगत् रज्जुसर्पवत् ब्रह्मणि मायया कल्पितमेव। यथा सर्पभ्रमस्याधिष्ठानभूतेन रज्जुसाक्षात्कारेण सर्पो निवर्तते तद्वत् अधिष्ठानब्रह्मसाक्षात्कारेण जगदिदं निवर्तते। तथा चोक्तम्-

मायामयमिदमखिलं हित्वा
ब्रह्मपदं त्वं प्रविश्य विदित्त्वा। (11)

तथा आत्मसाक्षात्कारेण संसारनिवृत्तिरिति लौकिकदृष्टान्तद्वाराऽत्र प्रतिपादितम्-

वयसि गते कः कामविकारः
शुष्के नीरे कः कासारः।
नष्टे द्रव्ये कः परिवारः।
ज्ञाते तत्त्वे कः संसारः।। इति। (10)

'यत्र द्वैतमिव भवति तदितर इतरं पश्यति" (बृहदारण्यकोपनिषत्, 4,5, 25) इत्यादिभिः श्रुतिभिः, तथा "प्रपञ्चो यदि विद्येत निवर्तेत न संशयः।" "ज्ञाते द्वैतं न विद्यते' (माण्डूक्यकारिका, 1.17)

"मायामात्रमिदं द्वैतमद्वैतं परमार्थतः" (मा.का. 1.18) इत्यादिभिः कारिकावचनैश्चैतत् समर्थ्यते। तथा प्रपञ्चस्य स्वप्नमायासमानतामुक्तम् आचार्येण-विश्वं त्यक्त्वा स्वप्नसमानम् इति (23) यथा स्वप्नपदार्थाः प्रतिभासकालपर्यन्तमेवावतिष्ठन्ते तथेदम् जगदपि आत्मसाक्षात्कारपर्यन्तमेवावतिष्ठते। प्रबोधे स्वप्नपदार्थाः निवर्तन्ते। तथैव सर्वमपीदं जगत् ब्रह्मसाक्षात्कारेण निवर्तते। अयमेवार्थः माण्डूक्यकारिकायां एवमुच्यते-

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः। (2.32)

संसारस्यास्य वैचित्र्यमप्यत्रोक्तमस्ति- "संसारोऽयमतीव विचित्रः" इति (23)। "अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मानसा-प्यचिन्त्यरचनारूपस्यास्य जगतः 'इति भाष्यकारेण श्रीशङ्करेण ब्रह्मसूत्रभाष्ये जगतः वैचित्र्यमधिकृत्योक्तम्।

आत्मतत्त्वमत्यन्तसूक्ष्मं दुर्विज्ञेयञ्च। अतः साक्षात्कृतात्मा ब्रह्मनिष्ठः पुरुष एव गुरुरुपदेष्टा। तदुक्तं-

त्रिजगति सज्जनसंगतिरेका
भवति भवार्णवतरणे नौका। इति। (13)
'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।
'क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।" (1.3.14)

"आचार्यवान् पुरुषो वेद" इत्यादि श्रुतिषु आचार्योपदेशादेव ब्रह्माधिगम इति सुस्पष्टमुपपादितम्।

ज्ञानादेवतु कैवल्यमित्युक्तम्। ज्ञानसंपादने अशक्तान् जनानुद्दिश्य उपासना कर्ममार्गश्च निर्दिश्येते। उपासनादिना चित्तशुद्धिः संभवति। शुद्धेऽन्तःकरणे ज्ञानं सम्यक् प्रतिफलति। तदुक्तम्-

गेयं गीतानामसहस्रम्
ध्येयं श्रीपतिरूपमजस्रम्।
नेयं सज्जनसङ्गे चित्तं
देयं दीनजनाय च वित्तम्। (27)

एवं गुरोः उपदेशं श्रुत्वा मननिदिध्यासनद्वारा निजहृदयस्थं अखण्डानन्दस्वरूपमात्मानं साक्षात्करोति, मोक्षं प्राप्नोति च। तथा चोक्तम्-

गुरुचरणाम्बुजनिर्भरभक्तः
संसारादचिराद्भव मुक्तः।
सेन्द्रियमानसनियमादेवं
द्रक्ष्यसि निजहृदयस्थं देवम्।। इति। (31)

PARIMAL PUBLICATIONS
Office : 27/28, Shakti Nagar, Delhi-110007 (India)
Retail Outlet : 22/3, Shakti Nagar, Delhi-110007 (India)
phs. : +91-11-23845456, 47015168
e-mail : order@parimalpublication.com
url : http://www.parimalpublication.com

ISBN 81-7110-611-0
9788171106110
Price : ₹ 350.00